National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(64): 126-129
© 2026 NJHSR
www.sanskritarticle.com

**श्री शिवप्रसाद शुक्लः**
सहायकाचार्यः (अतिथि),
व्याकरणविभागः, नासिकपरिसरः,
केन्द्रीय संस्कृत विश्वविद्यालयः

**Correspondence:**
**श्री शिवप्रसाद शुक्लः**
सहायकाचार्यः(अतिथि),
व्याकरणविभागः, नासिकपरिसरः,
केन्द्रीय संस्कृत विश्वविद्यालयः

# अजेर्व्यघञपोः सूत्रविमर्शः

**श्री शिवप्रसाद शुक्लः**

**कूटशब्दाः**- अज , वी, अघञपोः, आर्धधातुकम्, प्राजिता , व्यवस्थितविभाषा ।

**शोधसारः** - द्वितीयाध्यायस्य चतुर्थपादस्य षड्पञ्चाशत्तमं सूत्रमजेर्व्यघञपोः विधिरयं, शोधपत्रेस्मिन् सूत्रार्थविवेचनपुरस्सरं उदाहरणानि, दलसार्थक्यं, सूत्रार्थानुसारं प्रयोगसङ्क्रान्तेर्निवारणं, दीर्घान्तव्यादेशफलम्, घञपोः प्रतिषेधे क्यप उपसङ्ख्यानम् वार्तिकस्य प्रयोजनं, अप्प्रत्याहारकल्पनद्वारा तन्निराकरणं,भाष्यस्थव्यवस्थितविभाषापक्षः, तस्य फलं, एतत्सूत्रविषयकं भट्टोजिदीक्षितमतं, काशिकावृतिकृन्मतं, न्यासकृन्मतं, कैयटाभिमतखण्डनपूर्वकं रामकृष्णभट्टप्रणीतरत्नाकर व्याख्यानस्य ज्यायस्त्वं च यथामति विवेचितं वर्तते।

शास्त्रमिदं शब्दानुशासनं[1], शब्दशास्त्रं, पदशास्त्रमिति व्यवह्रियते। एतादृशं वैज्ञानिकं विस्तृतं च व्याकरणं विश्वस्मिन् जगति कस्याश्चिदपि भाषायाः नास्ति। व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेनेति व्याकरणमिति व्युत्पत्त्या शब्दानां शुद्धस्वरूपविरचनं व्याकरणस्य महत्त्वपूर्णदायित्वम्। शब्दाः न केवलं ध्वन्यात्मकाः अपितु परावाग्रूपाः ब्रह्मणोऽभिन्नाः निखिलजगदुपादानभूमयः सर्वैरभ्यर्चनीयाः[2]।

यदि अस्य पाणिनिव्याकरणस्य व्याख्यानात्मकं समग्रविकासं पश्यामः तर्हि तस्य त्रीणि रूपाणि दृष्टिपथमायान्ति इति वक्तुं शक्नुमः - अष्टाध्यायीक्रमः, प्रक्रियाक्रमः, दार्शनिकक्रमः च। येषु ग्रन्थेषु अष्टाध्यायीविधिं अनुसृत्य तत्तत्सूत्राणि व्याख्यातानि।ते ग्रन्थाः अष्टाध्यायी क्रमस्य अन्तर्गताः समाविष्टाः सन्ति; एतेषु प्रथमं नाम आगच्छति - श्रीवामन जयादित्यकृतस्य'काशिका' वृत्तिरित्यस्य। एतदतिरिक्तं महामुनिपतञ्जलिविरचितं महाभाष्यम्, श्रीमद्भट्टोजिदीक्षितस्य शब्दकौस्तुभ् इत्यादयः अस्य क्रमस्य मुख्याः ग्रन्थाः सन्ति ।

द्वितीयस्थाने प्रक्रियाक्रमः यदन्तर्गते श्रीमद्धर्मकीर्तेः रूपावतारः,

विमलसरस्वतिमहाभगानां रूपमाला, रामचन्द्राचार्याणां प्रक्रियाकौमुदी, श्रीमद्भट्टोजिदीक्षितां वैयाकरणसिद्धान्तकौमुदी आदि प्रमुखाः ग्रन्थाः सन्त्यस्मिन् क्रमे। शब्दस्वरूपस्य साधनदृष्टौ प्रकरणानुसारं पाणिनिसूत्राणां समायोजनमेवास्य क्रमस्य वैशिष्ट्यं, एष एव प्रक्रियाक्रमः वर्तमाने व्याकरणाध्ययने लोकप्रियः वर्तते। तृतीयस्थाने दार्शनिकक्रमः वर्तते, क्रमेऽस्मिन् श्रीभर्तृहरेः वाक्यपदीयं ग्रन्थः श्रेष्ठतां विभजते, तत्र ब्रह्मकाण्डं वाक्यकाण्डं पदकाण्डं इति नाम्ना काण्डत्रयं वर्तते, इतोपि स्फोटायनः, व्याडिः, पतञ्जलिः इत्यादयः सन्ति।

यद्यपि ग्रन्थेष्वपि स्फोटसिद्धिः, स्फोटप्रतिष्ठा, स्फोटतत्वं, स्फोटचन्द्रिका, स्फोटवादः इमे सन्ति तथापि इमे स्फोटमेव स्थापयन्ति न तु सर्वदार्शनिक तत्वमतः द्वितीयः ग्रन्थः शब्दकौस्तुभः, बृहद्वैयाकरण भूषणम्, वैयाकरणभूषणसारः एतेषु व्याकरणदर्शनस्य मौलिक तथ्यानि निर्णीतानि। तत्रापि विशेषतया श्रीमन्नागेशभट्टस्य अनितरसाधारणं योगदानं क्रमे ऽस्मिन् वर्तते, स च मञ्जूषा त्रय्याः कर्ता।

त्रिषु एतेषु क्रमेषु अजेर्व्यघञपोः सूत्रं प्रक्रिया क्रमे वर्तते।

सूत्रार्थः - अजेर्धातोर्वीत्ययमादेशो भवत्यार्धधातुके परतो घञपौ वर्जयित्वा यथा प्रवयणीयः[3] अत्र प्र-उपसर्गपूर्वक अज् धातोः तयोरेवकृत्यक्तखलर्थाः इत्यनुसारेण तव्यत्तव्यानीयरः सूत्रेण कर्मणि अनीयर्प्रत्यये कृते अजेर्व्यघञपोः

इति सूत्रेण आर्धधतुके अनीयर्प्रत्यये परे अजेर्धातोः वी आदेशो भवति ततः गुणे अयादेशे कृते कृत्स्थः यो नकारः अचः उत्तरः तस्य उपसर्गस्थान् निमित्तादुत्तरस्य णकारादेशो भवति इत्यर्थकेन कृत्यचः सूत्रेण कृत्संज्ञकानीयर्प्रत्ययस्थ नकारस्य णकारे कृते प्रवयणीयः इति सिद्ध्यति, तथैव प्र-उपसर्गपूर्वक अज् धातोः ण्वुल्तृचौ सूत्रेण ण्वुल्प्रत्यये कृते अजेर्व्यघञपोः इति सूत्रेण वी आदेशो भवति ततः वृद्धौ आयादेशे च कृते, प्रवायकः इति रूपम्। सार्वधातुकलकारेषु लट्लोट्लङ्विधिलिङ्क्षु शतृप्रत्यये च अज इत्येव रूपं भवति , यथा अजति अजतः अजन्ति अजसि अजथः अजथ अजामि अजावः अजामः इति रूपाणि भवन्ति लट् लकारे। लोट् लकारे अजतु, लङ् लकारे आजत्, विधिलिङ् लकारे अजेत्, शतृ-प्रत्यये अजत् इमानि सर्वाणि रूपाणि सार्वधातुकलकारे प्रत्यये च भवन्ति ।

परन्त्वत्रावधेयमिदम् यत् व्यादेश: आर्धधातुके विहित: तथापि तस्य प्रयोग: सार्वधातुकेष्वपि लडादिलकारेषु दृश्यते, तदा एवम्वक्तव्यं यत् तद्रूपं वी गति-व्याप्ति-प्रजन-कान्ति-असन-खादनेषु धातोः भवति, प्रजनार्थे लोकेऽपि अस्य धातोः प्रयोगः भवति यथा गाय ब्या रही है। भोजपुरी-भाषायाम् अपि गोरु वियातिया तथैव अन्येषाम् अपि धातूनां यथा ढौकते- ढुकाना, तकि (कृच्छ्रजीवने) तंकति - तंग करना, रख(गत्यर्थे) रखति - रखना, खुजु (स्तेयकरणे) खोजति- खोजना इत्यादि[4]। इदानीमस्माभिरेवं निष्कृष्टुं शक्यते यत् अजेर्व्यघञपोः सूत्रेण वी आदेश: आर्धधातुके, तर्हि सर्वत्र सार्वधातुके अज धातोः प्रयोगः तथैव व्यादेशेन आर्धधातुके वीघटितं रूपं सेत्स्यति अतः अस्य वी धातोः प्रयोगाणि सार्वधातुकविषयकाण्येव, इति निर्गच्छति ।

अत एव – सार्वधातुकलकारेषु लट्लोट्लङ्विधिलिङ्क्षु शतृप्रत्यये च क्रमशः वेति, वीतः, वियन्ति। वेतु वीतात् वीताम् वियन्तु। अवेत्, अवीताम् , अवियन् । वीयात् , वीयाताम् , वीयुः। वियत्।

"दीर्घान्त आदेशविषयकः विचारः - वी आदेशः दीर्घान्तः, परन्तु प्रवेता प्रवेतम् इत्यादौ गुणेन प्रवयणीयः इत्यादौ गुणेन अयादेशेन च प्रवायकः इत्यादौ वृद्ध्या आयादेशेन च ईकारे विकृति: दृश्यते, सा च विकृतिः ह्रस्व इकारमात्रविधानेन सम्भवति , दीर्घविधीनेन किं अपूर्व साध्यते ? इति चेत्, अस्माभिः तादृशं स्थलं अन्वेष्टव्यं यत्र विकृतिः न सम्भवति, तच्च- कित् आर्धधातुके क्तादिप्रत्यये, यतो हि गिित्किन्ङिन्निमित्ते इग्लक्षणे गुणवृद्धी न स्तः इत्यर्थकेन क्ङिति च[5] सूत्रेण इकः गुणवृद्ध्योः निषेधः भवति यथा संवीतिः(आवरणम्) अत्र सम् उपसर्गपूर्वक अज धातोः भावे अकर्तरि च कारके स्त्रीलिङ्गे धातोः क्तिन् प्रत्ययो भवति इत्यर्थकेन स्त्रियां क्तिन् सूत्रेण क्तिन् प्रत्यये अजेर्वी आदेशे च कृते रूपमिदं क्तिनः कित्वात् गुणः न भवति तथैव संवीतः(वेष्टितः) अत्रापि , दीर्घ इकार श्रवणार्थं दीर्घान्तः वी आदेशः आवश्यकः[6]।

अघञपो:' इत्यत्र विचारः यौ आर्धधातुकौ घञपौ प्रत्ययौ तौ वर्जयित्वा आर्धधातुके वी आदेश: , अत एव सम् + अज + घञ् समाजः, उद्+ अज + घञ्, उदाजः । "समुदोरज: पशुषु"[7] इति सूत्रेण पशुविषये 'समुदाये अर्थे - समजः, प्रेरणार्थे उदज: इति अप् प्रत्ययान्तौ शब्दौ निष्पाद्येते ।

परन्तु इदानीं सम् पूर्वात् अज् धातोः समजादिभ्यः स्त्रियां भावादौ क्यप्स्यात्स चोदात्तः सञ्ज्ञायाम् इत्यर्थकेन संज्ञायां समजनिषदनिपत-मनविदषुञ्शीङ्भृञिणः इति सूत्रेण क्यप् प्रत्यये, टापि समज्या इति रूपम् अत्र आर्धधातुकक्यप्प्रत्यये परे यादेशेन भाव्यम् इति दोष परिहाराय घञपोः प्रतिषेधे क्यप उपसंख्यानं कर्तव्यम् इति वचनेन क्यपि परे ङि आदेशः न भवति । अस्य द्वितीय परिहारः घञपोः इति पदे अप् न प्रत्ययः अपितु अप् प्रत्ययाभ्य क्यपः पान्तं प्रत्याहारः तेन क्यप् प्रत्ययं वर्जयित्वा अजेर्व्यादेशः, एतस्मिन् परिहारे अप्क्यपोर्मध्ये क्तिनः सद्भावात् संवीतिः अत्रापि क्तिनि व्यादेशो न भवेत्, अतः प्रत्याहारकल्पना न युक्ता ।

अजेर्व्यघञपोः सूत्रस्थं भाष्यम् तत्र प्राजनम्, समजनम्, उदजनम् इत्युदाहृता भाष्यकृता ल्युटि अजेः व्यादेशो न' इति ध्वनितम् इत्येको भाष्ये विशेषः। अपि च समज्या इत्यत्र व्यादेशवारणाय (घञपोः प्रतिषेधे क्यप उपसंख्यानं कर्तव्यम्) इति वार्तिकमुक्त्वा तत्प्रत्याख्यानाय एवं तर्हि नार्थ उपसंख्यानेन नापि घञपो: प्रतिषेधेन इदमस्ति चक्षिङः ख्याञ्, वा लिटि, ततो वक्ष्यामि अजेर्वी , अस्य तात्पर्यम् पूर्वसूत्रात् वाऽनुवर्त्य व्यवस्थितविभाषाश्रेण समज्या इत्यादौ व्यादेश वारणं सा च विभाषा क्वचित् भवति इत्येव, क्वचित् न भवति इत्येव, क्वचित् चोभयम् इति व्यवस्थया प्रवृत्ता विभाषा व्यवस्थितविभाषा इति नागेशेनोक्तम्। तर्हि व्यवस्थितविभाषया प्रवेता, प्रवेतुम् प्रवीतः संवीतः आदौ व्यादेशः , समाजः समजः उदाजः उदजः समज्या समजनमादौ न व्यादेशः , इति सर्वमिष्टं सिद्धं । एष एव पक्षः वैयाकरणसिद्धान्तकौमुदीरत्नकारेण रामकृष्णभट्टमहाभागे-नापि आदृतः ।

भाष्योक्त व्यवस्थितविभाषापक्षस्य फलं किम् चेत् भाष्यकारो ब्रूते इदमपि सिद्धं भवति प्राजिता अन्यथा तु प्रवेता इत्येव भवेत् अतः तृचि प्राजिता प्रवेता रूपद्वयं विभाषायाः फलम् । प्रवेता (गमनकर्ता) प्राजिता (संज्ञाशब्दः) नियन्ता प्राजिता यन्ता सूतः क्षत्ता च सारथिः इति अमरकोशवचनात् , विशिष्टो विचारः इदमपि सिद्धं भवति इति प्रतीकमाश्रित्य कैयटो ब्रवीति "वलादावार्धधातुके विकल्पः सिद्ध्यति इति भावः" तर्हि इदानीं तृचि एव नहि सर्वत्रार्धाधातुके लिडादिशु शतरि च वलादौ अजेर्व्यादिशः विकल्प्यते तेन व्यादेशाभावे आजिथ आजिव प्राजिम अजिता अजिष्यति इत्यादि रूपाणि इष्टानि। परन्तु

रत्नाकरे तन्न स्वीकृतं यदि एतत् वलादावार्धातुके वेष्यते वार्तिकं स्यात् तर्हि वार्तिककारः कथं ब्रूयात् व्यवस्थितविभाषायाः फलं प्रवेता प्राजिता इतिरूपद्वयं तदपि वार्तिकेनैव सेत्स्यति, अतः कैयटाचार्यस्य वार्तिकपक्षो न युक्तः ।

काशिकावृत्तिः – काशिकाकारः अजेर्वी आदेशो भवति , आर्धधातुके परतः घञपौ वर्जयित्त्वा इति सूत्रस्यार्थं उक्त्वोदाहरति प्रवयणीयः प्र+अज्+अनीयर् अत्र अजर्व्यघञपोः सूत्रेण वी आदेशे कृते सार्वधातुकार्धधातुकयोः सूत्रेण गुणे कृते अयादेशे प्रवयणीयः तथैव प्र+अज+ण्वुल् प्रत्ययेऽनुबन्धलोपे युवोरनाकौ इति सूत्रेण अकादेशे अजेर्व्यघञपोः इति वी आदेशे अचो ञ्णिति इति सूत्रेण वृद्धिकृते एचोऽयवायावः सूत्रेण आयादेशे प्रवायकः ।

अघञपोः इत्यस्य फलमपि दीक्षितस्येव समाजः समजः उदाजः उदजः प्रदत्तमस्ति । व्यादेशे दीर्घोच्चारणस्य च फलं प्रवीताः आदौ यत्र क्तिवात् गुणवृद्धी न प्राप्नुतः, तत्र ईकारश्रवणाय आवश्यकः। घञपोः प्रतिषेधे क्यप उपसंख्यानं तेन क्यपि अपि अजेः वी आदेशो न भवति, यथा समज्या अत्र संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृ-ञिणःसूत्रेण सम्पूर्वकाज् धातोः क्यप् प्रत्यये कृते रूपमिदं, अत्रार्धधातुके परतः अजेर्वी न भवति। (वलादावार्धधातुके विकल्प इष्यते ) अजेरूदात्तत्वात् धातुषूदात्तः पठ्यते यदि नित्यं अस्य धातोः अजेः वी भवेत् तर्हि उदात्तपाठोऽनर्थकः स्यात् यतो हि वी भावे कृते इट् प्राप्नोति तस्य च उदात्तत्वमतः विकल्पेन वलादावार्धधातुके वी आदेशः।[8]

न्यासकारजिनेन्द्रबुद्धेः आशयः – ( घञपोः प्रतिषेधे क्यप उपसंख्यानं कर्तव्यम् ) इत्यस्य नास्त्यावश्यकतेति न्यासकारस्य मतं – यतो हि संज्ञा नियतवर्णानुपूर्विका भवति अजेर्व्यादेशे कृते तु नियतवर्णानु-पूर्विकत्वं विहन्यते, अतः संज्ञायां समजनिषदनिपतमनविदषुञ्शी-ङ्भृञिणः सूत्रेण विधीयमानः क्यप् अजेरेव न तु वेः संज्ञायाः अविद्यमानात् तस्मात् संज्ञायां विधानात् क्यपि वी भावो न भवति इति सिद्ध्यति ।

भट्टोजिदीक्षितः- अजेर्वी इत्ययमादेशः स्यादार्धधातुकविषये घञपं च वर्जयित्त्वा अत्रैकः नवीनः विचारः वर्तते यत् आर्धधातुके इत्यत्र विषयसप्तमी अतः आर्धधातुकविषये इत्यर्थो भवति , तस्य फलं वर्तते यत् – अज धातोः आदौ वी कृते ततः धाचोरेकाचो हलादेः क्रियासमभिहारे यङ् इत्यनेन यङ् भवति यदि परसप्तमी आश्रीयते चेत् आर्धधातुके परे अजेः वी भवति इत्यर्थे अज् स्थितौ हलादित्त्वाभावात् यङ् न भवति तर्हि आर्धधातुकत्वाभावात् वी अपि न भवेत् , यदा विषयसप्तमी तदा तु आर्धधातुके भविष्यति अपि वी आदेशे यङ् भविष्यति । तेन वेवीयते इति यङन्तं सिद्ध्यति । अत्र यङः लुक् न भवति, यदि लुक् भवेत् तर्हि लुका यङोऽपहारे आर्धधातुकविषयत्वाभावात् अजेः वीभावस्य अप्रसक्तिः स्यात् तदर्थं नात्र यङो लुक् ।

(वलादावार्धधातुके वेष्यते) विवाय, विव्यतुः, विव्युः। विव्यतुः विव्युः, इत्यत्र यणादेशे कृते सति धातोः उपधाभूतयोः रेफवकारयोः हल्परयोः परतः इको दीर्घः स्यात् इत्यर्थकेन उपधायां च इति सूत्रेण हल्परक उपधाभूतवकारस्य इकः दीर्घः भवेत् इति प्रश्ने कृते उत्तरयति यत् अचः परस्मिन्पूर्वाविधौ सूत्रेण परनिमित्तकाजादेशः यण् , सः स्थानिवद्भविष्यति स्थानिभूताद् अचः पूर्वत्त्वेन दृष्टस्य इकः दीर्घे कर्तव्ये, अतः स्थानिवद्भावेन अच्परकत्त्वात् दीर्घो न प्राप्तः इति। पुनः अत्रोच्यते पदचरमावयवे द्विर्वचनादौ च कर्तव्ये अजादेशस्य स्थानिवद्भावो न भवेत् न पदानतद्विर्वचनरेयलोपस्वरसवर्णानुस्वार-दीर्घजश्चर्विधिषु इति सूत्रेण। इत्यस्योत्तरं – (स्वरदीर्घयलोपेषु लोपाजादेश एव न स्थानिवत् ) इति रूपेण वर्तते ।

भाष्यकारः (घञपोः प्रतिषेधे क्यप उपसंख्यानम्) तेन समजनं समजया अत्र क्यपि वी आदेशो न भवति पुनः तत्तर्हि वक्तव्यं, न वक्तव्यं, अपि इत्येव भविष्यति अत्रापि, इति न प्रत्ययग्रहणं अपितु प्रत्याहारग्रहणं क्व सन्निविष्टानां प्रत्याहारः, अपोऽकारात् प्रभृत्या क्यपः पकारात् पुनः तथा सति संवीतिः न सेत्स्यति, यतोहि अप् प्रत्याहारमध्ये क्तिनः अपि सत्त्वात् वी आदेशो न प्राप्तः, भाष्येऽग्रे – एवं तर्हि नार्थ उपसंख्यानेन, नापि घञपोः प्रतिषेधेन, इदमस्ति चक्षिङः ख्याञ् वा लिटि ततः अजेर्वी इति वक्ष्यामि, तदर्थः -अजेर्वी विभाषया भवति, सा च व्यवस्थितविभाषा तेन इष्टस्थले प्रवृत्तौ प्रवेता प्रवेतुम् प्रवीतो रथः, संवीतिः। अनिष्टस्थले च अप्रवृत्तौ – समाजः समजः उदाजः उदजः समजनं उदजनं समज्या इत्यादि। इदमपि सिद्धं भवति प्राजिता, आक्षेपभाष्ये – किं च भोः इष्यते एतद्रूपम्, बाढमिष्यते ।

एवं तर्हि सूत्रेणानेन सिद्धे यौ प्रभूते अजेर्वीत्ययमादेशो वा भवति इत्यर्थकं वा यौ इति सूत्रमनर्थकं स्यात्। समाधीयते यत् वक्तव्यं, किं प्रयोजनं, नेयं विभाषा अर्थात् वायौ सूत्रं पूर्वेण नित्यप्राप्ते विकल्पार्थं न, अपितु आदेशविधानाय वा इत्ययमादेशो भवति अजेः यौ परतः, तेन वायुः इति सिद्ध्यति। एवं तर्हि सूत्रेणानेन सिद्धे वा यौ इति सूत्रमनर्थकं स्यात्। समाधीयते यत् वक्तव्यं किं प्रयोजनं नेयं विभाषा अर्थात् वायौ सूत्रं पूर्वेण नित्यप्राप्ते विकल्पार्थं न, अपितु आदेशविधानाय वा इत्ययमादेशो भवति अजेः यौ परतः ,तेन वायुः इति सिद्ध्यति ।

निष्कर्षः- अजेर्व्यघञपोः सूत्रेण अर्धधातुकप्रत्ययेषु व्यादेशः, सार्वधातुके च अजेरेव प्रयोगः, यत्र च सार्वधातुके वीघटितं रूपं, तत्र वी गतिव्याप्तिप्रजनकान्ति असनखादनेषु धातोः रूपं बोध्यम् ,यथा-वेति, वेतु,अवेत् आदि। संवीतिः' इत्यादौ दीर्घेकारार्थं दीर्घान्तादेशः, सूत्रे अप्प्रत्याहाराश्रयणे संवीतिः न सिद्ध्येत्, अतः (घञपोः प्रतिषेधे क्यप उपसंख्यानम्) अनेन सम ज्यादौ व्यादेशवारणं, भाष्ये

व्यवस्थितविभाषया प्राजिता इदमपि सिद्धमन्यथा प्रवेता इत्येव भवेत् इत्यादि व्याख्यानेन व्यवस्थितविभाषा पक्षः सिद्धान्तितः। व्याख्यानेनानेन (वलादावार्धधातुके वेष्यते) इति वार्तिकस्य गतार्थत्वात, पृथक् नावश्यकमिदं वचनमिति वैयाकरणसिद्धान्तरत्ना-करकृतः रामकृष्णभट्टाः। काशिकाकारस्य, श्रीमद्भट्टो जिदीक्षितस्य च मतसाम्यं दृश्यते, न्यासकारेण जिनेन्द्रबुद्धिना ( घञपोः प्रतिषेधे क्यप उपसंख्यानम्) वार्तिक स्यानावश्यकत्वमेव बोधितं यत् संज्ञा नियतवर्णानुपूर्विका भवति, अजेर्वी कृते तद्धानिः, अत: न क्यपि अजेर्व्यादेशः निश्चितमाहत्य वक्तुं शक्यं यत् रत्नकारपक्षः गरीयान् ।

**सन्दर्भग्रन्थसूची**


१.आचार्यभर्तृहरिविरचितं वाक्यपदीयम्, ब्रह्मकाण्डम्, (पण्डितश्री-सूर्यनारायणशुक्लकृतभावप्रदीपाख्यव्याख्यासमलङ्कृतम्) काशी-संस्कृत-ग्रन्थमाला-924,चौखम्बासंस्कृतसीरीज वाराणसी, (1961)

२.प्रो. आजाद मिश्रो 'मधुकरः' रत्नाकरे हि व्यादेशो वलादावविशेषतः त्रैमुनी प्रथमोङ्क: व्याकरण विभागः लखनऊपरिसरः केन्द्रीय संस्कृत विश्वविद्यालयः 2016

३.भगवत्पाणिनिविरचिता अष्टाध्यायी, म. म. पण्डितराज डा. गोपालशास्त्री 'दर्शनकेशरी', गोपालदत्त पाण्डेय (सम्पा.) चौखम्बा सुरभारती प्रकाशन, वाराणसी (2015) ।

४.भगवत्पतञ्जलिविरचितं व्याकरणमहाभाष्यम् (भाष्यप्रदीपोद्द्योतसमुल्लसितम्) भ. श. जोशी (सम्पा.) चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली (2014)।

५.श्रीवरदराजाचार्यप्रणीता लघुसिद्धान्तकौमुदी, सम्पादकौ - श्रीनारायणदत्तत्रिपाणी, श्रीरामनारायणदत्तशास्त्री च, प्रकाशकः गीताप्रेस गोरखपुर (2017) ।

६.श्रीवामनजयादित्यविरचिता-काशिका,(न्यास-पदमंजरीभावबोधि-नी सहिता) जे.एस.एस. त्रिपाठी (सम्पा.), तारा वुक एजेंसी, वाराणसी (2016) ।


**पाद टिप्पणी**

[1] अथ शब्दानुशासनं (शास्त्रारम्भप्रतिज्ञाभाष्यम्) पृ.सं. ३

[2] अनादिनिधनं ब्रह्म शब्दतत्वं यदक्षरम्।
विवर्ततेऽर्थ भावेन प्रक्रिया जगतो यतः॥ (वाक्यपदीयम्)

[3] काशिकावृत्तिः सू.सं.२|४|५६

[4] त्रैमुनि (शोधपत्रिका)

[5] लघुसिद्धान्तकौमुदी पृ.सं ८७

[6] काशिकावृत्तिः सू.सं.२|४|५६

[7] पाणिनि सूत्र ३|३|६९

[8] न्यासः (जिनेन्द्रबुद्धिः)